# Rishidadhichiproktam Shiva Stotram

# ઋષિદધીચિપ્રોક્તં શિવસ્તોત્રમ્

## Document Information

Text title : Rishidadhichiproktam Shiva Stotram

File name : RRiShidadhIchiproktaMshivastotram.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 163-?||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિદધીચિપ્રોક્તં શિવસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
દધીચિરુવાચ

- -

કૃત્વૈવં કવચં પૂર્વં સ્તોત્રમેતત્પઠેન્નરઃ ।
સ્તોત્રં ચૈતન્મહેશેન તસ્મા આખ્યાતમાદરાત્ ॥ ૧૬૩॥

- -

હર હર મખહર પુરારે
નષ્ટસુરાસુર પાપારેઽધમારે ।
અધર્મારિ ભૂતભયઙ્કર
ભવભય હર શઙ્કરસંસારે ॥ ૧/? ॥

સર્ગસ્થિતિકારણ પુરાણ-
વિષમોક્ષણ પિનાકપાણે ।
ત્રિશૂલપાણે ચન્દ્રરેખાભરણ
કારણ કારણ મૃગપાણે ॥ ૨/? ॥

મણિગણમણ્ડિત -ફણગણ-
ફણિપતિભૂષિત નિર્જિતકામ ।
સમ્પૂર્ણકામ વિવિધા-
નન્તકલ્યાણગુણ ॥ ૩/? ॥

ગૌરીમનોઽભિરામ
યોગિમનોઽભિરામ ।
વિવિધનિર્મિતસામ ।
વિવિધ શ્રુત્યઽભિહિત
પરમાદ્ભુતધામ ॥ ૪/? ॥

સ્મરશાસન સુમેરુ-

રત્નરુચિરવરશિખર ।
શિખરિવર કૃતવાસ
કૃત્તિસમલङ્કૃત સ્મરશાસન ॥ ૫/? ॥

સંહત ધાત્રવલેપન
સન્દગ્ધાસુરવરકાનન ।
હિમગિરિનિભવૃષભાધિપ-
કેતન ગુરુતર કરુણાનિધાન ॥ ૬/? ॥

ધિક્કૃત સર્વામરજના-
નવરતાનન્દતુન્દિલસ્વાન્ત ।
શાર્દૂલચર્મવસન-
સમધિષ્ઠત મહામહાશ્મશાન ॥ ૭/? ॥

ભક્તભવ ભઞ્જન સોમ-
સૂર્યાગ્નિનયન કાલકૂટવિષાદન ।
જય જય મહેશ કેશવેશ
જય જયામ્બિકેશ ॥ ૮/? ॥

જય જય વિશ્વેશ જય જય
ગૌરીશ જયજય પ્રહત ગજાધીશ ।
જ્વલજ્જ્વાલિ મહાજ્વલન
સંસારં હર સંહરામરવર ॥ ૯/? ॥

નાશય નાશય પાતક-
મુન્મૂલયોન્મૂલય ભૂતભયમ્ ।
બોધય બોધય બોધ-
માહ્લાદયાહ્લાદય માનસમ્ ॥ ૧૦/? ॥

દેહિદેહિ મુક્તિમાપ્ત-
વરદાહિવન્દ્ય ચન્દ્રચૂડ ।
ઇન્દ્રચન્દ્રોપેન્દ્રાદિ સકલ-
સુરરત્નકિરીટપ્રભા ભૂષિત ॥ ૧૧/? ॥

દિવ્યરત્ન ખચિત
વિવિધમણિપાદુક ।
લક્ષ્મીપતિ નયનારવિન્દ પૂજિતપાદપદ્મ

મુનિવરહૃત્પદ્મનિવાસ ભુક્તિમુક્તિપ્રદ ॥ ૧૨/? ॥

દલિતામરવૈરિનિકર રાજિતમૃગશાબાઙ્કુ-
ચન્દ્રાવતંસ સમધિષ્ઠિત કાશીનગર ।
વરપ્રદ વરયોગિચિત્તચિન્તિત
ચિન્તિત જન મન્દ(દા)ર ॥ ૧૩/? ॥

મન્દારકુસુમકરવન્દારુ વૃન્દારક પૂજિત
જિતમન્મથ નન્દાનન્દિકુલકુલાચલ ।
રસાતલ તલાતલ સુતલ વિતલાદિ નાનાભુવન નાયક
નાયકરત્ન રત્નપુરવિલસત્પાદપઙ્કુજ ॥ ૧૪/? ॥

જગદેકનાયક જયજય મહાદેવ । ૧૫.૧/?

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિદધીચિપ્રોક્તં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૧૬૩-?॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 163-?..

Notes:
Ṛṣi Dadhīci ઋષિ દધીચિ conveys the related ŚivaStotram શિવસ્તોત્રમ્ (to the King) and mentions about the ŚivaKavacam શિવકવચમ્.
The latter can be accessed from one of the links given below.
Śloka numbering (after 163) in the source text seems missing (marked as /?) in most of this part. Renumbering from 1-15.1 has been done for readers′ reference.

Proofread by Ruma Dewan

*Rishidadhichiproktam Shiva Stotram*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*